|| श्रीः ||

# || ಶ್ರೀವಾತಪುರನಾಥಾಷ್ಟಕಮ್ ||

ಕುಂದಸುಮಬೃಂದಸಮಮಂದಹಸಿತಾಸ್ಯಂ
    ನಂದಕುಲನಂದ ಭರ ತುಂದಲನಕಂದಮ್ ।
ಪೂತನಿಜಗೀತ ಲವ ಧೂತ ದುರಿತಂ ತಂ
    ವಾತಪುರನಾಥಮಿಮಮಾತನು ಹೃದಬ್ಜೇ ॥ ೧

ನೀಲತರ ಜಾಲ ಧರ ಭಾಲಹರಿ ರಮ್ಯಂ
    ಲೋಲತರ ಶೀಲಯುತ ಬಾಲಜನಲೀಲಮ್ ।
ಜಾಲನತಿ ಶೀಲ ಮಪಿ ಪಾಲಯಿತುಕಾಮಂ
    ವಾತಪುರನಾಥಮಿಮಮಾತನು ಹೃದಬ್ಜೇ ॥ ೨

ಕಂಸರಣಹಿಂಸಮಿಹ ಸಂಸರಣಜಾತ-
    ಕ್ಲಾಂತಿ ಭರ ಶಾಂತಿಕರ ಕಾಂತಿಝರ ವೀತಮ್ ।
ವಾತಮುಖ ಧಾತುಜನಿ ಪಾತ ಭಯಘಾತಂ
    ವಾತಪುರನಾಥಮಿಮಮಾತನು ಹೃದಬ್ಜೇ ॥ ೩

ಜಾತು ಧುರಿ ಪಾತುಕಮಿಹಾತುರಜನಂದ್ರಾಕ್
ಶೋಕಭರಮೂಕಮಪಿ ತೋಕಮಿವ ಪಾಂತಮ್ ।
ಭೃಂಗರುಚಿ ಸಂಗರಕೃದಂಗ ಲತಿಕಂ ತಂ
ವಾತಪುರನಾಥಮಿಮಮಾತನು ಹೃದಬ್ಜೇ ॥ ೪

ಪಾಪ ಭವ ತಾಪ ಭರ ಕೋಪಶಮನಾರ್ಥಾ-
ಶ್ವಾಸಕರ ಭಾಸ ಮೃದು ಹಾಸರುಚಿರಾಸ್ಯಮ್ ।
ರೋಗ ಚಯ ಭೋಗ ಭಯ ವೇಗಹರಮೇಕಂ
ವಾತಪುರನಾಥಮಿಮಮಾತನು ಹೃದಬ್ಜೇ ॥ ೫

ಘೋಷಕುಲದೋಷಹರ ವೇಷಮುಪಯಾಂತಂ
ಪೂಷಶತ ದೂಷಕ ವಿಭೂಷಣ ಗಣಾಢ್ಯಮ್ ।
ಭುಕ್ತಿಮಪಿ ಮುಕ್ತಿ ಮತಿ ಭಕ್ತಿಷು ದದಾನಂ
ವಾತಪುರನಾಥಮಿಮಮಾತನು ಹೃದಬ್ಜೇ ॥ ೬

ಪಾವಕ ದುರಾಪ ಮತಿ ತಾಪಹರ ಶೋಭ-
ಸ್ವಾಪಘನ ಮಾಮತದುಮಾಪತಿಸಮೇತಮ್ ।
ದೂನತರ ದೀನ ಸುಖ ದಾನಕೃತದೀಕ್ಷಂ
ವಾತಪುರನಾಥಮಿಮಮಾತನು ಹೃದಬ್ಜೇ ॥ ೭

ಪಾದ ಪತ ದಾದರಣ ಮೋದ ಪರಿಪೂರ್ಣಂ
ಜೀವ ಮುಖ ದೇವಜನ ಸೇವನಫಲಾಂಘ್ರಿಮ್ ।
ರೂಕ್ಷ ಭವ ಮೋಕ್ಷಕೃತ ದೀಕ್ಷನಿಜ ವೀಕ್ಷಂ
ವಾತಪುರನಾಥಮಿಮಮಾತನು ಹೃದಬ್ಜೇ ॥ ೮

ಭೃತ್ಯಗಣಪತ್ಯುದಿತ ನುತ್ಯುಚಿತ ಮೋದಂ
ಸ್ಪಷ್ಟಮಿದ ಮಷ್ಟಕ ಮದುಷ್ಟಕರಣಾರ್ಹಮ್ ।
ಆದಧತ ಮಾದರದ ಮಾದಿಲಯಶೂನ್ಯಂ
ವಾತಪುರನಾಥಮಿಮಮಾತನು ಹೃದಬ್ಜೇ ॥ ೯

ಇತಿ ಶ್ರೀವೈಂಗಾನಾಡುಗಣಪತಿಶಾಸ್ತ್ರಿವಿರಚಿತಂ
ಶ್ರೀವಾತಪುರನಾಥಾಷ್ಟಕಂ ಸಂಪೂರ್ಣಮ್ ॥